नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **26**

No. of Printed Pages – **4**

# UP-71-संस्कृतम् (T.L.)

## प्रारम्भिक शिक्षा पूर्णता प्रमाण-पत्र परीक्षा – 2017

## कक्षा – 8

# तृतीय भाषा – संस्कृतम्

समय : **2.30** होरा ] [ पूर्णाङ्का: : **80**

**परीक्षार्थिभ्य: सामान्यनिर्देशा:**

(1) परीक्षार्थिभि: सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्का: अनिवार्यत: लेख्या: ।

(2) **सर्वे** प्रश्ना: अनिवार्या: ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागा: एकत्र एव लेखनीया: ।

(5) प्र. **1** से **8** तक बहुविकल्पीय प्रश्नों के उत्तर, तालिका बनाकर एक साथ लिखे ।

1. "रामलक्ष्मणौ" कस्य समासस्य उदाहरणम् अस्ति ? **1**

(क) द्विगु: (ख) बहुव्रीहि: (ग) द्वन्द्व: (घ) कर्मधारय:

2. "पुस्तकालय" इति शब्दस्य सन्धि-विच्छेदं भवति । **1**

(क) पुस्तका + लय (ख) पुस्तक + आलय

(ग) पुस्तक + अलय (घ) पुस्त + कालय

3. सम् उपसर्ग युक्तम् पदम् अस्ति । **1**

(क) सम्भाषणम् (ख) सार्द्धम् (ग) सद्गतिम् (घ) सुविचारम्

4. <u>राम:</u> पुस्तकं पठति । रेखांकित: शब्द: अस्ति । **1**

(क) विशेषणम् (ख) अव्ययम् (ग) संज्ञा (घ) सर्वनाम

5. "यौतकम् पातकम्" पाठस्य क्रम: अस्ति । **1**

(क) दशम (ख) षष्ठम (ग) पंचम (घ) नवम

6. "अधुना अहं गृहं गच्छामि" अस्मिन् वाक्ये अव्ययशब्द: वर्तते । **1**

(क) अधुना (ख) अहम्

(ग) गृहम् (घ) गच्छामि

7. "ग्रामम् परित: वृक्षा: सन्ति ।" इति वाक्ये विभक्ति: अस्ति । **1**

(क) पंचमी (ख) द्वितीया

(ग) तृतीया (घ) षष्ठी

8. "पठित्वा" इति शब्द: कस्य प्रत्ययस्य उदाहरणम् अस्ति ? **1**

(क) शानच् (ख) ल्यप्

(ग) क्त्वा (घ) तुमुन्

9. अधोलिखितशब्दानां सन्धि-विच्छेदं कुरुत । **½ × 4 = 2**

परोपकाराय, देवालय:, एकैक:, नरेन्द्र:

10. समास-विग्रहम् कुरुत – **½ × 4 = 2**

सीतारामौ, दशाननम्, राजपुरुष:, नीलकण्ठ:

11. धातु-प्रत्ययं योजयित्वा पदनिर्माणम् कुरु: **½ × 4 = 2**

पा + तुमुन, उप + गम् + ल्यप्, खाद् + क्त्वा, श्रेष्ठ + तरप्

12. निम्नलिखित पदेषु उपसर्गान् पृथक् कुरुत: **½ × 4 = 2**

आगच्छ, अनुरक्त:, प्रबल:, परिभ्रमति

13. सर्वनामशब्दानां प्रयोगं कृत्वा रिक्तस्थानानि पूरयत: । **½ × 4 = 2**

[तौ, यूयम, अहम्, त्वम्]

(क) .......... प्रात: विद्यालयं गच्छसि ।

(ख) .......... उद्याने भ्रमत: ।

(ग) .......... सर्वदा सत्यं वदामि ।

(घ) .......... विद्यालयं प्रति गच्छथ ।

14. अधोलिखितम् उदाहरणं पठित्वा विभक्तिं संयोज्य पूरयत । **2**

उदाहरण – दशरथ: <u>रामस्य</u> पिता अस्ति । (राम)

(क) राघव: ________ पति: अस्ति । (विमला)

(ख) लक्ष्मी ________ पत्नी अस्ति । (विद्याधर)

(ग) विद्याधर: ________ पिता अस्ति । (सरला)

(घ) सरला ________ सखी अस्ति । (नलिनी)

15. निर्देशानुसारेण रिक्तस्थाने क्रियाया: रूपं लिखत : **2**

(क) तस्य पितु: नाम कृष्णसिंह: ________ । (अस् धातु, लङ् लकार)

(ख) महाराणा फतेहसिंह: देहलीं ________ । (गम् धातु, लृट् लकार)

(ग) अहं राष्ट्राय कारागृहं _________ । (गम् धातु, लट् लकार)

(घ) सर्वे छात्रा: अद्य _________ । (पठ् धातु, लोट् लकार)

16. मञ्जूषात: अंकानां कृते पदानि चिनुत – **2**

**मंजूषा**

| अष्टचत्वारिंशत, एकोनविंशति:, अष्टात्रिंशत्, सप्तविंश |
|---|

(क) 48 _________ (ख) 38 _________

(ग) 27 _________ (घ) 19 _________

17. घटनाक्रमानुसारेण वाक्यानि लिखत – **5**

(क) ते कदाचित् मन्त्रणाम् अकुर्वन् ।

(ख) तत: तेनोत्सुकतया अस्थिसञ्चय: कृत: ।

(ग) ते मार्गे अरण्ये कतिचित् अस्थीनि अपश्यन् ।

(घ) कस्मिश्चिद् ग्रामे चत्वारो ब्राह्मणपुत्रा: वसन्ति स्म ।

(ङ) ते त्रय: अपि उत्थाय सिंहेन मारिता ।

18. सुमेलनं कुरुत – **5**

(क) सत्यं शिवं सुन्दरम् – भारतीय मौसम विभाग:

(ख) सर्वस्य लोचनं शास्त्रम् – राष्ट्रीय दूरदर्शनम्

(ग) शुभास्ते पन्थान: सन्तु – राजस्थान राज्य पथ परिवहन निगम

(घ) आदित्यात् जायते वृष्टि: – पेराडेनिया विश्वविद्यालय, श्रीलंका

(ङ) धर्मचक्र प्रवर्तनाय – लोकसभा

19. अधोलिखितानाम् प्रश्नानाम् उत्तराणि लिखत – **5**

(क) सुबुद्धि: कस्मात् अवतीर्य गृहं गत: ?

(ख) चन्द्रगुप्तस्य मन्त्री: क: आसीत् ?

(ग) महात्मागाँधी कुत्र स्वच्छताकार्यम् करोति स्म ?

(घ) नक्षत्राणां संख्या: कति सन्ति ?

(ङ) कुँवर प्रतापस्य माता का आसीत् ?

20. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत – **5**

(क) सरस्वती हस्ते किम् विदधाति ?

(ख) ज्ञानं क: लभते ?

(ग) केषां परित्राणाय ईश्वर: सम्भवति ?

(घ) सम्पतौ च विपत्तौ च केषाम् एकरूपता ?

(ङ) सिद्धवनम् क: अस्ति ?

21. रेखांकितपदानि आधृत्य प्रश्न निर्माणं कुरुत – **5**
   (क) <u>अस्मिन्</u> पाठे दीनबन्धुः विवेकानन्दः अस्ति ।
   (ख) राजपथेषु जनाः <u>अटनार्थम्</u> गच्छन्ति ।
   (ग) नरेन्द्रः वस्त्रेण <u>तस्य</u> व्रणपट्टिका अकरोत् ।
   (घ) मन्दिरं मत्वा <u>एकस्मिन्</u> भवनं प्रविष्टवान् ।
   (ङ) तस्य नेत्राभ्याम् <u>अश्रुधाराः</u> प्रवहति ।

22. पाठ्यपुस्तकस्य द्वौ श्लोकौ लिख्यताम्, यौ प्रश्नपत्रे न स्तः । **5**

23. दिनद्वयस्यावकाशार्थम् प्रधानाध्यापकं प्रार्थनापत्रं संस्कृते लेखनीयम् । **6**

**अथवा**

मञ्जूषातः पदं चित्वा षड्वाक्यानि लिखत ।

**मंजूषा**

| |
|---|
| अस्माकं, विद्यालये, अध्यापकाः, छात्र-छात्राश्च, पुस्तकालयः क्रीडाक्षेत्रे |

24. "संहतिः श्रेयसीपुंसाम्" **अथवा** "विद्याया बुद्धिरूत्तमा" कथायाः सारः एकपृष्ठेन हिन्दीभाषायां लिखत । **6**

25. अधोलिखितस्य श्लोकस्य भावार्थः हिन्दीभाषायां लिखत – **7**

न चौरहार्यम् न च राजहार्यम्,
    न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं,
    विद्याधनं सर्वधनम् प्रधानम् ।।

**अथवा**

मृदपि च चन्दनमस्मिन् देशे, ग्रामो ग्रामः सिद्धवनम् ।
यत्र च बाला देवीस्वरूपा, बालाः सर्वे श्रीरामाः ।।

26. अधोलिखित गद्यांशं अवधानेन पठित्वा प्रश्नानाम् उत्तराणि ददातु । **7**

प्राचीन भारतीय महान् गणितज्ञः आर्यभट्टः प्रकाशस्य गतिं सम्यक् जानाति स्म । पृथ्वी गोलाकारा अस्ति । पृथ्वी स्व अक्षे भ्रमति, तेन एव दिवारात्रौ भवतः । पृथ्वी सूर्यस्य परिक्रमाम् करोति तेन एव ऋतवः भवन्ति । सप्ताहे दिनानाम् क्रमः, प्रकाशस्य गतिः, कालगणनाः, खगोलविज्ञानम्, त्रिकोणमिति इत्यादिषु क्षेत्रेषु आचार्यः आर्यभट्टः बहुकार्यम् कृतवान् ।

   (क) उपरोक्तगद्यांशस्य उपयुक्तं शीर्षकं किम् ?
   (ख) प्राचीन भारतीय महान् गणितज्ञः कः आसीत ?
   (ग) दिवारात्रौ केन भवतः ?
   (घ) 'प्रकाशस्य' इति शब्दे का विभक्तिः ? किं वचनम् ?
   (ङ) पृथ्वी कीदृशी अस्ति ?
   (च) ऋतवः कति सन्ति ?
   (छ) पृथ्वी कस्य परिक्रमाम् करोति ?

---